National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 157-158
© 2026 NJHSR
www.sanskritarticle.com

**विष्णु पारीक**
शोधच्छात्रः, वेदभाष्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः।

**Correspondence:**
**विष्णु पारीक**
शोधच्छात्रः, वेदभाष्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः।

# वैतानश्रौतसूत्रे चातुर्मास्ययागानुष्ठानविधेः अध्ययनम्

**विष्णु पारीक**

**सारांशः -**

वैदिकश्रौतपरम्परायां चातुर्मास्ययागस्य विशिष्टं महत्त्वं विद्यते। अथर्ववेदीयश्रौतपरम्परायाः वैतानश्रौतसूत्रे चातुर्मास्ययागस्य विधानं द्वितीयाध्याये प्रतिपादितमस्ति। अस्मिन् शोधपत्रे वैतानश्रौतसूत्रानुसारेण चातुर्मास्ययागस्य अनुष्ठानप्रक्रियायाः विश्लेषणात्मकमध्ययनं प्रस्तुतम्। यतो हि सम्प्रति वैतानश्रौतसूत्रे प्रतिपादितानां यागकर्मणां कश्चित् पद्धतिग्रन्थः नैव विद्यते। वैश्वदेवपर्व, वरुणप्रघासपर्व, साकमेधपर्व तथा शुनासीरीयपर्व इति चतुर्णां पर्वणां कालक्रमः, यागविधानम्, होमक्रमः तथा मन्त्रानुमन्त्रणस्य स्वरूपं विशेषतया विवेचितम्। वैश्वदेवपर्वणि विहितानाम् अष्टानां यागानां तथा तेषामनुमन्त्रणविधानस्य, वरुणप्रघासपर्वणि द्वयोर्वेद्योः प्रयोगस्य, साकमेधपर्वणि विविधेष्टीनां विशिष्टानुष्ठानस्य, शुनासीरीयपर्वणि विहितानां यागानां च निरूपणं कृतम्। अध्ययनस्य अन्ते वैतानश्रौतसूत्रे अथर्ववेदीयब्रह्मणः, आग्नीध्रस्य तथा यजमानस्य विशेषभूमिका, अनाम्नातधर्माणां च यजुर्वेदीयश्रौतसूत्रेभ्यः अतिदेशस्य व्यवस्था च प्रकाशिता।

**कुंजीशब्दाः -**

वैतानश्रौतसूत्रम्, चातुर्मास्ययागः, वैश्वदेवपर्व, वरुणप्रघासपर्व, साकमेधपर्व, शुनासीरीयपर्व, अनुष्ठानप्रक्रिया, मन्त्रानुमन्त्रणम्, अतिदेशः, अथर्ववेदीयश्रौतपरम्परा।

**विषयवस्तु -**

तस्य चातुर्मास्ययागस्य अथर्ववेदीये वैतानश्रौतसूत्रे प्रक्रियाः कथं भवन्तीति मया विचारः करिष्यते। यतोहि अथर्ववेदस्य श्रौतयागानुष्ठानपरम्परा सम्प्रति लुप्ता जाता। केवलं अथर्ववेदस्य वैतानश्रौतसूत्रमेव उपलभ्यते।

वैतानश्रौतसूत्रे द्वितीयाध्याये चातुर्मास्ययागः आम्नायते। तत्र ''**फाल्गुन्यां पौर्णमास्यां चातुर्मास्यानि प्रयुञ्जीत**"। इत्यनेन चातुर्मास्ययागस्यारम्भकालः उपदिष्टः। **"पूर्वेद्युर्वैश्वानरपार्जन्येष्टिर्वा अग्ने वैश्वानर, अभक्रन्दस्तनय, इति**"। इत्यनेन फाल्गुन्याः पौर्णमास्याः पूर्वेद्युर्विकल्पेन वैश्वानरपार्जन्येष्टिः विहिता। तत्र प्रधानयागे अग्निं वैश्वानरं द्वादशकपालयागं **अग्ने वैश्वानर** इति मन्त्रेण अनुमन्त्रयते। पर्जन्यदेवताकं चरुयागम् **अभिक्रन्दस्तनय** इति मन्त्रेण अनुमन्त्रयते। (आभिमुख्येन मन्त्रणम् अनुमन्त्रणम्) इति वैश्वानरपार्जन्येष्टौ विशेषः वैतानसूत्रे आम्नातः।

इदानीं वैश्वदेवपर्वणि विशेषाः– वैश्वदेवे निर्मथ्यमग्निमाहवनीये प्रक्षेपणानन्तरम् अनुमन्त्रणं विधानम्। **वैश्वदेवे निर्मथ्यं प्रहृतं भवतं नःसमनसौ (मा.५,३) इत्यनुमन्त्रयते**। (वै.२-४-१०) मथितस्याग्नेः प्रहरणा-नन्तरं होममनुमन्त्रयते। **अग्रावग्निः** इति मन्त्रेण। **"अग्रावग्निः (अ४. ३६.६) इति होमम्**। यत्र यत्र निर्मन्थनं तत्र तत्रैवं प्रहृतहोमानुमन्त्रणे भवतः। यथा वरुणप्रघासादौ पश्वादिषु च। **"एवं निर्मन्थनम्"**। (वै.२-४-१२) वैश्वदेवपर्वणि अष्टयागाः[1] भवन्ति। ते च यथा- आग्नेयोऽष्टाकपालयागः, सौम्यश्चरुयागः, सावित्रोद्वादशकपालयागः, सारस्वतश्चरुयागः, पौष्णश्चरुयागः, मारुतसप्तकपालयागः, वैश्वदेवीपय-

स्यायागः, द्यावापृथिवीयः एककपालयागश्च। एतेषाम् अष्टानां यागानामनुमन्त्रणं विहितमस्ति। तद्यथा- प्रथमं आग्नेययागं **अग्निर्वनस्पतीनाम्** इति मन्त्रेण अनुमन्त्रयते। द्वितीयं सौम्ययागं **सोमोवीरुधाम** इति मन्त्रेण अनुमन्त्रयते। तृतीयं सावित्रयागं **"सोमो वीरुधाम्** "इति मन्त्रेण अनुमन्त्रयते। चतुर्थं सारस्वतयागं "**सरस्वति व्रतेषु** इति मन्त्रेण अनुमन्त्रयते। पञ्चमं पौष्णयागं **प्रपथे पथाम्** इति मन्त्रेण अनुमन्त्रयते। षष्ठं मारुतं सप्तकपालयागं **मरुतः पर्वतानाम्** इति मन्त्रेण अनुमन्त्रयते । सप्तमं वैश्वदेवयागं **विश्वे देवा मम** इति मन्त्रेण अनुमन्त्रयते। अष्टमं द्यावापृथिवीययागं **द्यावापृथिवी दातृणाम्** इति मन्त्रेण अनुमन्त्रयते। वाजिनयागं "**अर्वाचीनं वसुविदम्** इति मन्त्रेण अनुमन्त्रयते। वाजिनयागानन्तरं हुतशेषस्य वाजिनस्य होत्रादयः परस्परं सहोपाह्वानं कृत्वा **यन्मे रेतः** इति मन्त्रेण प्राणभक्षान् भक्षयन्ति। प्रत्यक्षभक्षं यजमानः करोति। "तस्य प्राणभक्षान् भक्षयन्ति होत्रध्वर्युयजमानः मिथः समुपहूय । **यन्मे.....भक्षयामि** (१५-४)। इति वैश्वदेवपर्व। इति प्रकृतिः। एतद् वैश्वदेवं वरुणप्रघासादीनां प्रकृतिर्भवति। नवप्रयाजाः नवानुयाजाश्च भवन्ति ॥ अथ द्वितीये वरुणप्रघासपर्वणि विशेषाः- वरुणप्रघासे द्वे वेदी भवतः। अग्निप्रणयनमुभाभ्याम् अध्वर्युप्रतिप्रस्थातृभ्याम्। अग्न्योः प्रणीयमानयोः दक्षिणतः ब्रह्मा **अग्ने प्रेहि** इति मन्त्रं जपन् व्रजति। अग्न्योर्यो दक्षिणोऽग्निस्तं दक्षिणतो विधिवदुपविशति ब्रह्मा। दक्षिणस्याग्नेः पूर्वेण गत्वा उत्तरेऽग्नौ पुरस्तात् होमान् हुत्वा दक्षिणे च अग्नौ जुहोति। अतिचारं पृष्टां पत्नीम् इदमापः प्रवहत इति मन्त्रेण मार्जयन्ति। वैश्वदेवपर्ववत् पौष्णान्तान् पञ्चहोमान् तथा ऐन्द्राग्नस्य द्वादशकपालस्य वारुण्याः आमिक्षायाः मारुत्याः पयस्यायाः दक्षिणवेद्यग्नौ हूयमानायाः कायस्य एककपालस्य उत्तरेऽग्नौ। एतानेव यथाक्रमं होमान् अनुमन्त्रयते। पौष्णान्तानां मारुतस्य च वैश्वदेववत् मन्त्राः, ऐन्द्राग्नस्य प्रकृतिवत्। अवभृथः सोमात्। अन्तरेण वेदी विष्णुक्रमाः इति वरुणप्रघासपर्व॥

अथ साकमेधपर्वणि विशेषाः– कार्तिक्यां साकमेधाः भवन्ति। कार्तिक्यां पूर्वेद्युः प्रातरिष्ट्याम् अग्नेरनीकवतः सम्बन्धिनम् अष्टाकपालहोमम् **अचिक्रदत्** इति मन्त्रेण अनुमन्त्रयते। मध्यन्दिने सान्तपनीयेष्ट्यां मरुतां चरुहोमम् अनुमन्त्रयते। सायङ्काले गृहमेधीयेष्ट्यां मरुतां क्षीरौदनस्य होमम् अनुमन्त्रयते। इयं गृहमेधीयेष्टिः आज्यभागादीडान्ता भवति। श्वोभूते पौर्णमास्यां पौर्णदर्वहोमम् अनुमन्त्रयते **पूर्णा दर्वि** इति मन्त्रेण। क्रीड़नीयेष्टौ क्रीडिनां मरुतां सप्तकपालस्य होमम् अनुमन्त्रयते कृष्णं नियानम् इति मन्त्रेण। महाहविषेष्ट्यां प्रधानेष्टौ ऐन्द्राग्नान्तान् षड्यागान् वरुणप्रघासवद् अनुमन्त्रयते। माहेन्द्रम् एकादशकपालम्, वैश्वकर्मणम् एककपालम् **ये भक्षयन्तः** इति मन्त्रेण अनुमन्त्रयते। माहेन्द्रयागस्य अनुमन्त्रणं प्रकृतिवत् दर्शेष्टिवत् भवति। पित्र्येष्ट्याम् अनुमन्त्रणम् प्रकृतीष्टिवत् भवति। पित्र्येष्ट्याम् आज्यभागान्तं यावद् दैवावृत् सर्वम् अनुमन्त्रणं भवति। चतुरः पुरस्तात् होमान् प्रात्याम्नायकान् दक्षिणाग्नेः सकाशात् अतिप्रणीतेऽग्नौ प्राङ्मुखो जुहोति। दक्षिणतस्तमग्निं गत्वा प्रत्यङ्मुखो विधिवद् उपविशति। उत्तरेणाग्निम् अतिक्रम्य प्रत्यङ्मुखो यजमानः उपविशत्याग्नीध्रश्च अस्तु स्वधा इति प्रत्याश्रावयति। इडाम् अवजिघ्रन्ति पित्र्येष्ट्याम्। परिषिक्ते दैवावृत् प्रथमं शंय्वन्ता इयं पेत्र्येष्टिः भवति। यस्मिन् पित्र्येष्टिः कृता ततः निष्क्रामन्तः **अया विष्ठा** इति मन्त्रः जपन्ति। प्राञ्चोऽभ्युत्क्रम्य उदस्य केतवः इति आदित्यम् उपतिष्ठन्ते दक्षिणाञ्चो दिवं पृथिव्याम् इति मन्त्रेण अभ्युत्क्रम्य अग्नीत् सर्वान् उपतिष्ठन्ते। उदञ्चोऽभ्युत्क्रम्य चतुष्पथे त्र्यम्बकेष्टिः विहिता। तस्यां त्रैयम्बकेष्ट्यां त्रैयम्बकं पुरोडाशयागमनुमन्त्रयते। यजमानार्यजनाः सव्यहस्तपुरोडाशाः दक्षिणान् ऊरून् आघ्नानाः त्रिः प्रसव्यम् अग्निम् अनुपरियन्ति **त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्** इति। दक्षिणहस्तपुरोडाशाः प्रदक्षिणम् अनुपरियन्ति। मृतयोः प्रमुक्तयोः यो नः स्वः इति जपति। दक्षिणावृतः गृहान् आगच्छन्ति। आदित्येष्टिः आदित्येष्ट्यां चरुहोमम् **अदितिर्द्यौः** इति मन्त्रेण अनुमन्त्रयते। इति साकमेधपर्वणि वैतानसूत्रे विशेषाः॥

अथ शुनासीरीयपर्वणि विशेषाः- फाल्गुन्यां शुनासीर्यम् पर्व भवति। पुनः चातुर्मास्यप्रयोगे फाल्गुन्याः पौर्णमास्याः पूर्वेद्युः शुनासीर्यं भवति। तस्मिन्नेव अहनि पुनः प्रयोगार्थं विकल्पेनैव वैश्वानरपार्जन्येष्टिः भवति। शुनासीरीये पर्वणि पौष्णान्ताः पञ्च यागाः वैश्वदेववद्भवन्ति। वायव्ययागम् **एकया च** इति मन्त्रेण अनुमन्त्रयते। शुनासीर्ययागं **शुनासीरेह** इति मन्त्रेण अनुमन्त्रयते। सौर्ययागं **सूर्यश्चक्षुषाम्** इति मन्त्रेण अनुमन्त्रयते॥

**उपसंहारः-**

एवं वैतानश्रौतसूत्रे अथर्ववेदोक्तानां प्रक्रियाणामध्ययनेन ज्ञायते यदत्र तावत् अथर्ववेदीयस्य ब्रह्माख्यस्य ऋत्विजः आग्नीध्रस्य, यजमानस्य च एव वर्तते। अन्यत् सर्वं यजुर्वेदीयश्रौतसूत्रात् अतिदेशो भवति। यतो हि उक्तञ्च - **ब्रह्मा कर्मणि ब्रह्मवेदविद् दक्षिणतो विधिवद् उपविशति वाग्यतः इति।** अर्थात् – **ब्रह्मा कर्मणि** इत्यनेन ब्रह्मणः कर्तृत्वं परिभाष्यते। कर्मणि वाचनाऽनुमन्त्रणपुरस्ताद् होमेत्यादिषु। तथा स च ब्रह्मा ब्रह्मवेदविद् भवेत् (अथर्ववेदविद्) **होमान् आदिष्टान् अनुमन्त्रयते** इति होमान् इत्यनेन सर्वान् आदिष्टान् होमान् अनुमन्त्रयते। तदर्थं सूत्रेणैव मन्त्राः निर्दिष्टाः सन्ति। यत्र न निर्दिष्टाः तत्र होमदेवतालिङ्गवता मन्त्रेण आनुमन्त्रणं कर्तव्यमिति भागलिराचार्यो मन्यते। मन्त्राऽनादेशे केन मन्त्रेण अनुमन्त्रणं कर्त्तव्यम् इति नैकानि मतान्तराणि समाम्नातानि परिभाषाध्याये। वैतानश्रौतसूत्रे अनाम्नाताः सर्वे धर्माः कथमनुष्ठेयाः इति जिज्ञासायां परिभाषाध्याये पठ्यते यद् **देवता हविर्दक्षिणा यजुर्वेदात्** इति। अतः यजुर्वेदीयश्रौतसूत्राच्चातुर्मास्ययागस्य देवताः तथा तासां देवतानां हविः, तथा दक्षिणा च अतिदिश्यन्ते। हविषः स्वीकारात् हविस्संस्काराः अनुक्ताः अङ्गक्रियाश्चेति अतिदिश्यन्ते। एवं प्रकारेण वैतानश्रौतसूत्रे चातुर्मास्ययागस्य आम्नातानां क्रियाणामेव अत्र अध्ययनं मया कृतो वर्तते॥

**सन्दर्भग्रन्थाः-**

**१. वैतानश्रौतसूत्रम्-** विश्वबन्धुना सम्पादितम्।

**२. कात्यायनश्रौतसूत्रम्- विद्याधरशर्मा**

**३. अथर्ववेदीयसंहिता**

**४. वाजसनेयिसंहिता**

**पाद टिप्पणी: -**

[1]यागो नाम तिष्ठता होमो येषु ते, वषट्कारेण हविः प्रदानं येषु ते, तथा याज्यावन्तः पुरोनुवाक्यावन्तश्च ये, ते यागाः इत्युच्यन्ते।